International Journal of Sanskrit Research 2023; 9(4): 153-155

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(4): 153-155
© 2023 IJSR
www.anantaajournal.com
Received: 18-05-2023
Accepted: 23-06-2023

**Yogita Chhatre-Kelkar**
Assistant Professor, School of Sanskrit, Philosophy and Indic Studies, Goa University, Goa, India

**Corresponding Author:**
**Yogita Chhatre-Kelkar**
Assistant Professor, School of Sanskrit, Philosophy and Indic Studies, Goa University, Goa, India

# हर्षकीर्तिविरचितधातुतरङ्गिण्याः पाठसमीक्षात्मके अध्ययने अवलोकितानां विशिष्टांशानां विमर्शः

**Yogita Chhatre-Kelkar**

**सारांश**
श्रीहर्षकीर्तिसूरिविरचितायाः धातुतरङ्गिण्याः स्वोपज्ञटीकायाः संपादनात्मके अध्ययने ये विशिष्टाः अंशाः समुपदृष्टाः तेषां विन्यसनमत्र परामर्शपूर्वकं क्रियते । सारस्वतव्याकरणानुसारी अयं ग्रन्थः धातुपाठं बिभर्ति। यद्यपि अयं ग्रन्थः अनुभूतिस्वरूपाचार्यस्य सारस्वतव्याकरणमाश्रित्य रचितः तथापि अनेन धातुपाठकारेण कृतः स्वसूत्रन्यासे पाणिनीयसूत्रन्यासे च भेदोऽवलोक्यते।
ग्रन्थकारेण प्रारम्भे स्थानप्रयत्नविषये विस्तृतं चिन्तनं कृतं वर्तते। ततः भ्वाद्यदादिगणविभागपुरस्सरं प्रत्येकं गणे वर्तमानानां धातूनां प्रत्येकं लकारे प्रथमाणि रूपाणि दत्तानि अत्र धातुरूपाणां क्रमकथनस्य विषये अवधेयः अंशः वर्तते।
तत्र तिङन्तप्रक्रियायां विद्यमानाः केचन विशिष्टांशाः, पाणिनीये तथा च धातुतरङ्गिण्युक्ते धातुपाठे विद्यमानाः धात्वर्थभेदाः, उभयत्र अवलोक्याः सूत्रन्यासभेदाः इत्यादयः तिङन्तप्रक्रियाज्ञानजिज्ञासूपकारकाः विषयाः विमृश्यन्ते । संदर्भेऽस्मिन् क्वचित् क्वचित् पाणिनीयः धातुपाठः) सार्थः, (माधवीयधातुवृत्तिः, क्षीरतरङ्गिणी, दैवः धातुपाठः, इतीमे अर्थनिरूपणपराः तथा च धातुवृत्तिसमेताः ग्रन्थाः परिशील्यन्ते।

**कूटशब्द** : हर्षकीर्तिः, धातुतरङ्गिणी, धातुपाठः, लकाराः, पदव्यवस्था, सूत्रन्यासः

## प्रस्तावना
अद्यत्वे धातुरूपाणां सुलभतया अवगमनार्थं छात्रैः धातुरूपचन्द्रिकासदृशानि पुस्तकानि आश्रियन्ते। आचार्यायाः पुष्पादीक्षितावर्यायाः धातुरूपकोषाः, विदुषः जनार्दनहेगडेवर्यस्य धातुरूपनन्दिनी इत्येतादृशाः आधुनिकाः ग्रन्थाः छात्राणां महदुपकारकाः। षोडशे शतकेऽपि धातुरूपस्मरणार्थं धातुरूपसंग्रहरूपः यत्नः केनचित् वैयाकरणेन व्यधायि, तस्य प्रकाशनम् इतरशोधार्थमुपस्थापनं चेति शोधस्यास्य फलितांशः। अनेन शोधकार्येण तिङन्तप्रपञ्चे शोधं चिकीर्षूणां साहाय्यं भविष्यति इति विश्वसिमि।

## मङ्गलाचरणविचारः
मङ्गलाचरणं त्रिविधम् - आशीर्नमस्क्रियात्मकं वस्तुनिर्देशात्मकं चेति । भाष्यकारः सिद्धे शब्दार्थसंबन्धे इति वार्तिके मङ्गलस्य प्रयोजनमित्थं ब्रूते - मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति । आशीर्नमस्कारवस्तुनिर्देशात्मकमङ्गलाचरणेषु ग्रन्थस्यास्य मङ्गलं तावन्नमस्कारात्मकम् ।
अत्र जैनसम्प्रदायानुगुणं सर्वज्ञः भूतभविष्यद्वर्तमानवित् जिनः प्रार्थ्यते । तथा च सरस्वत्याः तेजः अपि ग्रन्थपरिसमप्त्यर्थं स्मर्यते।

नमस्कृत्य महोनन्तं नित्यं सत्यं चिदात्मकम् ।
स्वोपज्ञधातुपाठस्य क्रियते पञ्जिका मया ॥[1]॥

श्रीसर्वज्ञं जिनं नत्वा स्मृत्वा सारस्वतं महः
सारस्वते धातुपाठं वक्षे संक्षेपतः स्फुटम् ॥[2]॥

## मङ्गलाचरणस्यान्वयः इत्थम्
मया अनन्तं नित्यं सत्यं चिदात्मकं महः) तेजः (नमस्कृत्य स्वोपज्ञधातुपाठस्य टीका क्रियते ।
सर्वज्ञं जिनं नत्वा सारस्वतं महः स्मृत्वा सारस्वते स्फुटं धातुपाठं संक्षेपतः वक्ष्ये।

अत्र वक्षे इति रूपमशुद्धम् । यतो हि वच् परिभाषणे इति धातोस्तु लृट्लकारे भविष्यति उत्तमपुरुषैकवचने रूपं तु वच्मीति भवतीत्यतः सोऽयमत्र न प्रयुक्तः। अत्र प्रयुक्तस्य ब्रूञ् व्यक्तायां वाचि इत्यस्य रूपं त्विदं न भवति । अस्य धातोः लृटि उत्तमपुरुषैकवचने इटि तस्य एकारादेशे स्यविकरणप्रत्यये चस्य कुत्वे सकारस्य षत्वे वक्ष्ये इति रूपस्य सिद्धेः।

**धातुतरङ्गिण्यां तथा च पाणिनीये व्याकरणे विकरणप्रत्ययविचारः**

धातूनां दश गणेषु कृतस्य विभागस्य परिज्ञानाय विकरणप्रत्ययाः आधारीकर्तव्याः भवन्ति। प्रकृतिप्रत्ययान्तः पतति यः प्रत्ययः सः विकरणः इति सारस्वतव्याकरणकारः। विकरणप्रत्यययोजनात् परं यत् रूपं भवति तत् अङ्गमित्युच्यते । तदङ्गं दृष्ट्वा धातूनां सादृश्यमवलोकयितुं शक्यते । यथा प्रथमे , चतुर्थे ,षष्ठे दशमे चेति । तत्र पाणिनीये सारस्वते च विकरणप्रत्ययेषु ईषद् असाम्यं , तेषां कथनक्रमे च किञ्चन भेदः अवलोक्यते । तदत्र कोष्ठकरूपेण प्रदर्श्यते ।

पाणिनीयव्याकरणे

| गणनाम | विकरणविधायकं सूत्रम् | प्रत्ययः प्रथमधातोः रूपं च |
|---|---|---|
| भ्वादिः | कर्तरि शप् | शप् - भवति |
| अदादिः | अदिप्रभृतिभ्यः शपः | लुक् - अत्ति |
| जुहोत्यादिः | जुहोत्यादिभ्यः श्लुः | .... - जुहोति |
| दिवादिः | दिवादिभ्यः श्यन् | श्यन् - दीव्यति |
| स्वादिः | स्वादिभ्यः श्नुः | श्नुः - सुनोति |
| तुदादिः | तुदादिभ्यः शः | शः - तुदति |
| रुधादिः | रुधादिभ्यः श्नम् | श्नम् - रुणद्धि |
| तनादिः | तनादिकृञ्भ्य उः | उः - तनोति |
| क्र्यादिः | क्र्यादिभ्यः श्ना | श्ना - क्रीणाति |
| चुरादिः | ......चुरादिभ्यो णिच् | णिच् - चोरयति |

धातुतरङ्गिण्याम्

| गणनाम | विकरणविधायकं सूत्रम् | प्रत्ययः प्रथमधातोः रूपम् |
|---|---|---|
| भ्वादिः | अप् कर्तरि | अप् - भवति |
| अदादिः | अदादेर्लुक् | लुक् - अत्ति |
| ह्वादिः | अथ लुग्विकरणस्यापि जुहोत्यादिगणस्य.... | .... - जुहोति |
| दिवादिः | दिवादेर्यः | यः - दीव्यति |
| स्वादिः | स्वादेर्नुः | नुः - सुनोति |
| रुधादिः | रुधादेर्नम् | नम् - रुणद्धि |
| तनादिः | तनादेरुप् | उप् - तनोति तनुते |
| तुदादिः | तुदादेरः | अः - तुदति |
| क्र्यादिः | ना क्र्यादेः | ना - क्रीणाति |
| चुरादिः | चुरादेर्णात् स्वार्थे ञिः प्रत्ययः भवति | ञिः - चोरयति |

पाणिनिना विकरणप्रत्ययेषु यत्शित्वं विहितं तदनेकप्रयोजनहेतुनैव। तिङ्शित्सार्वधातुकमिति सूत्रेण शितां सार्वधातुकत्वे विहिते सार्वधातुकमपिदिति तस्य ङिद्वत्भावे गुणनिषेधरूपं कार्यं विधीयते।

तद्यथा – तुदादिभ्यः शविकरणप्रत्ययविधानेन तोदति इति रूपनिवारणसिद्धिः।

धातुतरङ्गिणीकारेण प्रोक्तेषु विकरणेषु शित्वाभावः दृश्यते – अप् कर्तरि , दिवादेर्यः ,स्वादेर्नुः ,रुधादेर्नम् ,तुदादेरः ,ना क्र्यादेः इत्यत्र।

तुदादेरः, दिवादेर्यः इत्यादिप्रत्ययेषु शित्वाभावे धातुतरङ्गिणीकारस्य मते गुणवारणं कथमिति चिन्त्यम्। तत्र लटि प्रथमपुरुषैकवचने तुदति ,दीव्यतीत्येव रूपाणि हर्षकीर्तेः। सारस्वतव्याकरणे अपित्तादिर्ङित् इति सूत्रेण पिद्भिन्नः तथा च तादिर्यः सः प्रत्ययः ङकारानुबन्धं विनापि ङित्त्वं प्राप्नोति । ङित्त्वस्य प्रयोजनं तु गुणाभावः। क्ङित्यद्युसि इति सूत्रेण धातोर्गुणः बाध्यते । एवञ्च उपर्युक्तस्थलेषु गुणवारणं विहितम्।

**णिजन्ते आत्मनेपद-परस्मैपदनिर्णयः**

सत्यापपाशवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचुरादिभ्यो णिच् इति सूत्रेण चुरादिगणे पठितेभ्यः धातुभ्यः स्वार्थिकः णिच् विधीयते । हेतुमति चेति सूत्रेण तु धातुसामान्यात् हेतुमत्यर्थे णिज्विधानं क्रियते । यदाऽस्य णिजन्तस्य आतिदेशिकधातोः पदव्यवस्थाविषये चिन्त्यते तदा णिचश्च इति सूत्रेण वैकल्पिकी पदव्यवस्था विहिता पाणिनीये । एवञ्च णिजन्तात् भावयति-भावयते ,पालयति-पालयते इत्येवं विकल्पः दृश्यते । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः इत्याद्यपवादैस्तु बोधयतीत्येवमेकमेव रूपं भवति ।

सारस्वतव्याकरणे तावत् धातोः प्रेरणे इति सूत्रेण प्रेरणार्थकः ञिः प्रत्ययः विधीयते। परन्तु पाणिनीये इव वैकल्पिकपदव्यवस्थाविधायकं किमपि सूत्रम् अत्र न दृश्यते । धातुतरङ्गिण्यामपि भावयति ,पालयति ,घ्रापयति इत्यादि परस्मैपदीनि रूपाण्येव दृश्यन्ते ।

**पाणिनीये तथा च सारस्वते तिङन्तप्रकरणे सूत्रन्यासभेदः**

**यमिरमिनम्याकारान्तानामिट् सक्च**

यमरमनमातां सक्च[1]

पाणिनीये सूत्रे आर्धधातुकस्येड्वलादेरिति सूत्रात् इट्-पदस्यानुवृत्तिः भवति। परं सारस्वतव्याकरणस्य सूत्रे इट्-पदग्रहणं कृतं वर्तते। अनयोः सूत्रयोः प्रवृत्तिस्तु अयंसीत् अनंसीत् इत्यादिषु सगागम-इड्विधानरूपा। धातुतरङ्गिण्यां स्वीकृतः सूत्रन्यासः यमिरमिनम्याकारान्तानामिट् सक्च इति। मूलसारस्वते तु आदन्तानां यमिरमिनमीनां सेरिट् सक्च पे वक्तव्यौ इति सूत्रन्यासो वर्तते।

पाणिनेः सूत्रे कृतं चकारग्रहणम् अनुवृत्तिकथनपरं सार्थकं भवति । परं धातुतरङ्गिण्याः सूत्रे कृतं चकारग्रहणं निरर्थकं सत् मात्रालाघवनियमविरुद्धं प्रतिभाति।

**इडत्यर्तिव्ययतीनां नित्यमिट्**

इडत्यर्तिव्ययतीनाम्[2]

स्वरितत्वाभावेन विभाषा सृजिदृशोरिति पूर्वसूत्रात् विभाषापदस्यानुवृत्तेरभावात् पाणिनिना नित्यमिति पदं स्वकीये सूत्रे नोपन्यस्तम् । सारस्वते तु नित्यमिति पदोपन्यासः कृतः सूत्रे ।

**ऋऋतां अवृद्धिनिमित्तं लिटि गुणः (आर, आरतुः)**

ऋच्छत्यृताम्[3]

सूत्रेणानेन ऋच्छतेरङ्गस्य, ऋ इत्येतस्य, ॠकारान्तानां च लिटि परतः गुणो विधीयते ।

हर्षकीर्तेः सूत्रे अवृद्धिनिमित्तमिति कथनं चिन्त्यम् ।

**जापयति इति रूपसिद्धौ भेदान्तरं लक्ष्यते सूत्रयोः।**

जि जये इति धातोः णिजन्ते रूपं जापयतीति । तत्र प्रक्रिया–

जि इ अ ति

जा इ अ ति

जाप् इ अ ति

---

[1] ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004 (पा. सू. 7-2-73)

[2] ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004 (पा. सू. 7.2.66)

[3] ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004 (पा. सू. 7.4.11)

अत्र क्रीड्जीनां णौ इति सूत्रेण आत्वे विहिते ततः अर्तिह्रीव्लीक्नूयीक्ष्माय्यातां पुङ्णौ) पा .सू .7.3.36 (इति सूत्रेण पुगागमो विधीयते पाणिनीये । धातुतरङ्गिण्यां तु ईङादेर्डौ पुक् चेति एकेनैव सूत्रेण आत्वं पुगागमश्च विधीयते ।

**जनखनसनां वा आत्वम् यादौ – खन्यात् खायात्**

जनसनखनां सञ्झलोः[4]

ये विभाषा[5]

आकारादेशविधानपरं सूत्रमिदं सूत्रन्यासभेदं बिभर्ति । विड्वनोरनुनासिकस्यात् 6.4. 41इत्यस्माद् पूर्वसूत्राद् जनसनखनां सञ्झलोः इति पाणिनीये सूत्रे आदिति अनुवर्तते इति कृत्वा पुनः आत्वग्रहणं न। अनेन सूत्रेण जन सन खन इत्येतेषामङ्गानां सनि झलादौ क्ङिति झलादौ प्रत्यये परतः आकारादेशो विधीयते। तदग्रिमं सूत्रं च ये विभाषेति । अनेन सूत्रेण यादौ किति प्रत्यये परे जनसनखनामाकारादेशो विधीयते।

जनखनसनां वा आत्वम् यादौ इति हर्षकीर्तेः सूत्रेण खायात् इत्यत्र आकारादेशविधानं कृतं दृश्यते । यदि यादौ प्रत्यये परतः अनेन सूत्रेण आत्वविधानं तर्हि झलादौ क्ङिति प्रत्यये परतः का व्यवस्था इति चिन्त्यम् । किञ्च चिखनिषति इति रूपं हर्षकीर्तिना प्रादर्शीति कृत्वा तन्मते झल्ग्रहणाभावे आत्वनिवारणपरा का व्यवस्था इतीदं चिन्त्यं भवति ।

अत्र धातूनामानुपूर्व्यामपि भेदोऽवलोक्यते जनसनखनामिति-जनखनसनामिति च।

**क्रमः पे दीर्घता**

क्रमः परस्मैपदेषु[6]

क्रमु पादविक्षेपे इति धातोः भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः एभ्यो वा श्यन् इति सारस्वतसूत्रेण विकल्पेन श्यन् तथा च दिवादित्वं उक्तम् । पाणिनिसूत्रं तु वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः इति। अनेन कर्त्रर्थे सार्वधातुके परे श्यन् विधीयते परं च धातोः दिवादित्वं तु पृथक्तया नोच्यते।

**ऊदुपधाया गुह**

ऊदुपधाया गोह

पाणिनीये कृतलघूपधगुणस्य गुहेर्निर्देशः गोह इति। ततश्च गुणविषये एवेदं भवतीति बालमनोरमाकारः। भाष्यकारेणापि अथ किमर्थं गोहः इति विकृतनिर्देशः क्रियते न गुहः इत्येवोच्येत इत्येवं विकृतनिर्देशप्रयोजनवार्तिके चर्चा विहिता । तत्र गुणविषये सम्मुखीभूते एव ऊदादेशः इति उपन्यस्तम्।

**आत्मनेपद-परस्मैपदनिर्णय**

धातूनामात्मनेपद-परस्मैपदोभयपदव्यवस्था स्वरानाश्रित्य भवति। उदात्तानुदात्स्वरिताः स्वराः। धातूनामनुनासिकत्वमवलम्ब्य तेषां स्वराणामित्संज्ञा विधीयते । तां च इत्संज्ञामाश्रित्य पाणिनिना अनुदात्तङित आत्मनेपदम्, स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यादीनि पदव्यवस्थाविधायकानि सूत्राणि व्यरचि । अस्य अनुनानिकोच्चारणस्य अदर्शनात् त्रैस्वर्यस्य चाभावात् अद्यत्वे धातोः पदव्यवस्थावगमनं न अवगमनयोग्यम् । अत एवोच्यते - प्रतिज्ञानुनासिक्याः पाणिनीयाः इति । यथा शास्त्रकृद्भिः पठितः अनुनासिकपाठः परिभ्रष्टः तथैव सस्वरः धातुपाठोपि ।

पाणिनेरिव सारस्वतव्याकरणकारस्य पदव्यवस्था स्वरान् अवलम्बते । तथा हि तस्य कारिका-

उदात्तेतः स्मृता येऽत्र परस्मैपदिनो हि ते । अनुदात्तेतो ङितोप्येवमात्मनेपदिनः पुनः॥4॥

ये धातवः अनुदात्तेतः ङितश्च ते आत्मनेपदिनो ज्ञेयाः, ये स्वरितेतः ञितश्च ते उभयगामिनः स्युः तथा च ये अत्र उदात्तेतः स्मृताः ते परस्मैपदिनो हि ।

**अत्र सारस्वतव्याकरणकारेणोच्यते**

भ्वादिः - भू सत्तायामित्यादिशब्दो धातुसंज्ञो भवति । स च त्रिविधः, आत्मनेपदी, परस्मैपदी उभयपदी चेति । आदनुत्तदात्तङितः । अनुदात्तेतो ङितश्च धातोरादित्यात्मनेपदं भवति । ञित् स्वरितेत् उभे । ञितः स्वरितेश्च धातोरुभे आत्मनेपदपरस्मैपदे भवतः । (आत्मगामि इत्यादि)

परतोऽन्यत् । पूर्वोक्तविधुरादन्यस्मात् धातोः परस्मैपदं भवति । इति ।

धातुतरङ्गिणीकारेण अत्र कारिकायामुल्लिखिते वाक्ये कश्चन दोषः स्फुटः ।

तच्च वाक्यमेवम् - ये च धातवो अनुदात्तेत इति संज्ञकाः कल्पयिष्यन्ते पुनर्येषां कवर्गङकार इत् यास्यति ते धातवः आत्मनेपदिनो ज्ञेयाः ॥ 4॥

अत्र कवर्गङकारः इत् यास्यति इत्यस्य स्थाने इतं यास्यति इति उचितम् इच्छब्दस्य कर्मत्वात् कर्मणि द्वितीयायाः संगतत्वाच्च ।

**उपसंहारः**

अद्यत्वे मातृकासंरक्षणाध्ययनयोः प्रपञ्चः सुमहान् वर्तते यस्मिन् परिश्रमे कृते विशिष्टस्य ज्ञानसागरस्य मार्गः उद्घाटितो भविष्यति। न केवलं संस्कृते अपि तु विश्वस्य विविधासु भाषासु विद्यमानाः असंख्याकाः मातृकाः मानवचिन्तनस्य आविष्कृतिरूपाः विराजन्ते यासु नितरां महत्त्वपूर्णः ज्ञानराशिः वरीवर्ति। हर्षकीर्तिविरचितेयं धातुतरङ्गिणीति धातुपाठसहिताटीका पाठसमीक्षायां पाठसंपादनात्मके अध्ययने च प्राकाश्यं यास्यतीति विदुषां नूत्नव्याकरणच्छात्राणां च प्रमोदाय भवेद्। अत्रोक्ताः विषयाः पाणिनीयेन सह तोलयित्वा उभयत्र न्यूनताधिक्यस्य चिन्तनं कर्तुं शक्यते।

**सन्दर्भ**


1. ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004
2. अनुभूतिस्वरूपाचार्यः, सारस्वतव्याकरणम्, निर्णयसागरप्रेस्, 1907
3. डा. राजेशचुन्नीलालव्यास, सारस्वतव्याकरण की पुञ्जराजटीका का समीक्षित पाठसंपादन, परिमलप्रकाशन, 2011
4. आ. बलदेवोपाध्यायः, संस्कृतशास्त्रों का इतिहास, वाराणसीसंस्कृतविद्यालयः, 1983
5. युधिष्ठीरमीमांसक, संस्कृतव्याकरणशास्त्र का इतिहास, रामलालतकपूरट्रस्टप्रेस्, 1984


[4] ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004 (पा. सू. 6.4.42)

[5] (पा. सू. 6.4.43)

[6] ईश्वरचन्द्रः, अष्टाध्यायी, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, 2004 (पा. सू. 7.3.76)